2026 **UGSVDS603/26**

संस्कृतवेदाध्ययनविभाग:

UGSVDS603

अथर्वेदीयसाहित्यम् -१

Full Marks :60

Time :$2\frac{1}{2}$ Hours

(The figures in the margin indicate full marks for the questions)

लघूत्तराणि प्रदेयानि - **1×10=10**

1. ओषधिः का?
2. किलासपलितनाशनसूक्तस्य विनियोगः कः ?
3. महद्ब्रह्मसूक्ते कति मन्त्राः सन्ति?
4. 'रोदसी' इति शब्दस्य कोऽर्थः?
5. 'विश्वानि' इत्यस्य वैदिकरूपं किम्?
6. 'सांमनस्यम्' इत्यनेन किं बुध्यते ?
7. रथः कस्य देवस्य गर्भोऽस्ति ?
8. दुन्दुभिसूक्तस्य विनियोगः कः?
9. 'नरिष्टा' इत्यस्य कोऽभिप्रायः ?
10. आसुरी का आसीत् ?

अधस्तनेषु ***केषाञ्चित् पञ्चानां*** व्याख्या विधेया - **6×5=30**

11. किलासं च पलितं च निरितो नाशया पृषत् ।
    आ त्वा स्वो विशतां वर्णः परा शुक्लानि पातय ॥
12. इदं जनासो विदथ महद् ब्रह्म वदिष्यति ।
    न तत् पृथिव्यां नो दिवि येन प्राणन्ति वीरुधः ॥
13. सहृदयं सांमनस्यमविद्वेषं कृणोमि वः ।
    अन्यो अन्यमभि हर्यत वत्सं जातमिवाघ्न्या ॥
14. वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः ।
    गोभिः संनड्वो असि वीडयस्वास्थाता ते जयतु जेत्वानि ॥

15. वेनस्तत् पश्यत् परमं गुहा यद् यत्र विश्वं भवत्येकरूपम् ।
इदं पृश्निरदुहज्जायमानाः स्वर्विदो अभ्यनूषत व्राः ॥
16. विद्म ते सभे नाम नरिष्टा नाम वा असि ।
ये ते के च सभासदस्ते मे सन्तु सवाचसः ॥
17. आ क्रन्दय बलमोजो न आ धा अभि ष्टन दुरिता बाधमानः ।
अप सेध दुन्दुभे दुच्छुनामित इन्द्रस्य मुष्ठिरसि वीडयस्व ॥

अधोलिखितेषु प्रश्नेषु ***कयोश्चित्द्वयोरुत्तरं*** प्रदेयम् - **10×2=20**

18. किलासपलितनाशनसूक्तमधिकृत्य एको लेखः प्रस्तूयताम् ।
19. महद्ब्रह्मसूक्तस्य दार्शनिकतत्त्वमुल्लिख्यताम् ।
20. सांमनस्यसूक्तस्य सारांशो लिख्यताम् ।
21. दुन्दुभिसूक्तस्य माहात्म्यमुपस्थाप्यताम् ।

****